# Shri Shripadaraja Ashtakam 2

# श्रीश्रीपादराजाष्टकम् २

## Document Information

Text title : Shri Shripadaraja Ashtakam 2

File name : shrIpAdarAjAShTakam2.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : shrInidhiyati

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# श्रीश्रीपादराजाष्टकम् २

श्रीमत्या जाम्बवत्या यदुपतिनगरे पूजितः फल्गुणेन
प्राप्रस्तेनार्चिताम्फ्रिस्सकल सुखकरे पाण्डुरङ्गेतरङ्गे ।
भूमौक्षेत्रेथ गुप्तस्सकल बुधगुरोर्यस्यलब्धोवतान्मां
स्वप्ने श्रीमान् रमेशः प्रभुवरतनया सत्यभामा समेतः ॥ १॥

श्रीमत् श्रीपादराज प्रमुख यतिवरानादराधीत शास्त्रा-
नाह्वयाति प्रमोदा प्रवदत भवतां तावदेवाद्य शिष्यः ।
यावत्सामर्थ्यमस्तीत्युदितवति गुरौ प्रागुपन्यस्तवान्यः
श्रीमानाद्यन्तयुक्तां बुधसदसि सुधां सोवतान्मां यतीन्द्रः ॥ २॥

सायङ्काले कदाचित् गुणगणभरिते स्पर्णवर्णे यतीन्द्रे
दूरेग्रामः पुरस्तात्कियति कथय मे बालकेति ब्रुवाणे ।
सूर्यं मां स्थैरभां स्वं सकल बुधमणे पश्य किं त्पां ब्रुवेहं
यो वादीत्स्वर्णवर्णं गुरुमिति सहसा सोवतान्मां यतीन्द्रः ॥ ३॥

जित्वानीशं नृपेण प्रबल गजपतिं कङ्कणद्वन्द्वमेकं
यस्मै दत्तं मनोज्ञं तदनु नरपते भोगनार्यो निशायाम् ।
यद्रूपः श्रीरमेशः परिजनसहिते जागरूके द्वितीयं
दत्तं भूपाळमौळौ पुनरपि ददतासोवतान्मां यतीन्द्रः ॥ ४॥

पातुः श्रीपादराज सखिवर रघुनाथार्ययुक्तः कदाचित्
गङ्गास्नानाय गच्छन् पतिनृपसदनं प्राप्य भैक्षं ययाचे ।
पादप्रक्षाळनार्थं स्थितवति यतिपे भर्त्सनादस्य कोपात्
गेहे दग्धेति नम्रं पदयुगळगतं यो ररक्षावनीशम् ॥ ५॥

यच्छिष्यो व्यासराजः प्रतिभटजनता सर्वगर्वापहर्ता
कर्ता ग्रन्थत्रयस्य प्रतिभट विजय प्रोच्चशास्त्रोत्तमस्य ।
प्रख्याता यत्प्रशिष्या जगति च विजयीन्द्राख्य योगीन्द्रचन्द्रा
श्रीमत् श्रीवादिराज प्रमुख यतिवरा सोवतान्मां यतीन्द्रः ॥ ६॥

यद्वाग्वज्राभिदोच्छ प्रबलतम महाग्रन्थ वज्रेण हृष्य
 दुर्वादिक्ष्माधराणां यतिवरसुरपच्छेदयामास पक्षान् ।
यस्य श्रीवादिराज प्रमुख यतिवरैर्वर्णितु नैव शक्यं
 माहात्म्यं तापसेन्द्रः स भवतु नितरां भूयसे श्रेयसे मे ॥ ७॥

नीलापार्थार्चिताङ्घ्रिः कलुषय च हरे भीमरथ्यास्सुतीरे
 रङ्गक्षेत्रेथ गुप्तः सकल सुरपतिर्वेणुगोपालकृष्ण ।
स्वप्ने लब्धोयमस्या द्विजवर गुरवे व्यासराजाय येना-
 दायी श्रीपादराजः स भवतु नितरा भूयसे श्रेयसे मे ॥ ८॥

इति श्रीनिधियतिविरचितं श्रीपादराजाष्टकं सम्पूर्णम् ।

Encoded and proofread by Krishnananda Achar

*Shri Shripadaraja Ashtakam 2*

pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*